শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীৱ্যাসমহর্ষি ৱিরচিতং

# ॥ শ্রীরামভুজঙ্গাষ্টকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীরামভুজঙ্গাষ্টকম্ ॥

ভজে ৱিশেষসুন্দরং সমস্তপাপ খণ্ডনম্।
স্ৱভক্ত চিত্তরঞ্জনং স দৈৱরামমদ্ৱযম্॥ 1 ॥

জটাকলাপশোভিতং সমস্তপাপনাশকম্।
স্ৱভক্তভীতিভঞ্জনং ভজেহরামমদ্ৱযম্॥ 2 ॥

নিজস্ৱরূপবোধকং কৃপাকরং ভৱাপহম্।
সমং শিৱং নিরঞ্জনং ভজেহরামমদ্ৱযম্॥ 3 ॥

সপ্রপঞ্চকল্পিতং হ্যনামরূপৱাস্তৱম্।
নিরাকৃতিং নিরামযং ভজেহরামমদ্ৱযম্॥ 4 ॥

নিষ্প্রপঞ্চ নির্ৱিকল্প নির্মলং নিরামযম্।
চিদেকরূপসন্ততং ভজেহরামমদ্ৱযম্॥ 5 ॥

ভৱাব্ধিপোতরূপকং হ্যশেষদেহকল্পিতম্।
গুণাকরং কৃপাকরং ভজেহরামমদ্ৱযম্॥ 6 ॥

মহাৱাক্য বোধকৈর্ৱিরাজমানৱাকপদৈঃ।
পরংব্রহ্মৱ্যাপকং ভজেহরামমদ্ৱযম্॥ 7 ॥

শিৱপ্রদং সুখপ্রদং ভৱচ্ছিদং ভ্রমাপহম্।
ৱিরাজমানদেশিকং ভজেহরামমদ্ৱযম্॥ 8 ॥

রামাষ্টকং পঠতি যস্সুকরং সুপুণ্যং
ৱ্যাসেন ভাষিতমিদং শৃণুতে মনুষ্যঃ।

ৱিদ্যাং শ্রিযং ৱিপুলসৌখ্যমনন্তকীর্তিং
সংপ্রাপ্য দেহৱিলযে লভতে চ মোক্ষম্॥ 9॥

॥ শ্রীরামভুজঙ্গাষ্টকং সমাপ্তম্॥